# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| कक्षा-आचार्य-२ | प्रश्नपत्रम् – ५ | गुणाः – ७० |
| विषयः – पुराणेतिहासः | सत्रम्- ४ चतुर्थम् | समयः- ११:३० तः ०२:३० |
| दिनाङ्कः – ३१/०३/२०२० | सन्दर्भग्रन्थः – विष्णुपुराणे ४ तः ६ अंशाः | |

---

### प्रथमान्वितिः (Unit 1)

गुणाः

**प्रश्नः १ कस्याप्येकस्य पद्यस्य सन्दर्भप्रसङ्गान्वयपूर्वकं व्याख्यानं कुर्वन्तु।** ०५

१ नाहं प्रसूता पुत्रेण नान्यापत्यभवत्तव।
स्नुषा सम्बन्धता ह्येषा कतमेन सुतेन ते।।

२ सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः।
सुकुमारकमारोदीस्तव ह्येष स्यमन्तकः।।

**प्रश्नः २ कस्याप्येकस्योत्तरं सविस्तरं यथाग्रन्थं लिख्यताम्।** १०

१ सागरवंशोत्पन्नश्रीरामचरितं वर्णयन्तु।

२ शिशुपालपूर्वजन्मान्तरकथापूर्वकं वसुदेववर्णनं कुर्वन्तु।

### द्वितीयान्वितिः (Unit 2)

**प्रश्नः ३ कस्याप्येकस्य पद्यस्य सन्दर्भप्रसङ्गान्वयपूर्वकं व्याख्यानं कुर्वन्तु।** ०५

१ युवयोर्घातिता गर्भाः वृथैवैते मयाधुना।
कोऽप्यन्य एव नाशाय बालो मम समुद्गतः।।

२ क्षीरवत्य इमा गावो वत्सवत्यश्च निर्वृताः।
तेन संवर्द्धितैः सस्यैः तुष्टापुष्टाः भवन्ति वै।।

**प्रश्नः ४ कस्याप्येकस्योत्तरं सविस्तरं यथाग्रन्थं लिख्यताम्।** १०

१ भगवदवतारवर्णनं वसुदेवदेवकीकारागारमुक्तिं च लिखन्तु।

२ पूतनावधशकटभञ्जनलीलावर्णनं कुर्वन्तु।

### तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ कस्याप्येकस्य पद्यस्य सन्दर्भान्वयप्रसङ्गपूर्वकं व्याख्यानं कुर्वन्तु।** ०५

१ अहं रामश्च मथुरां यास्यावः श्वः सह त्वया।
गोपवृद्धाश्च यास्यन्ति ह्यादायोपायनं बहु ।।

२ तुतोषपरमप्रीत्या तरुराजमनुत्तमम्।
तं दृष्ट्वा प्राह गोविन्दं सत्यभामा द्विजोत्तम ।।

**प्रश्नः ६ कस्याप्येकस्योत्तरं यथाग्रन्थं सविस्तरं लिखन्तु।** १०

१ अक्रूरस्य गोकुलयात्राप्रसङ्गः वर्णनीयः।

२ बलरामकृतव्रजविहारयमुनाकर्षणप्रसङ्गः वर्णनीयः।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ कस्याप्येकस्य पद्यस्य सन्दर्भप्रसङ्गान्वयपूर्वकं व्याख्यानं कुर्वन्तु।** ०५

१ वित्तेन भविता पुंसां स्वल्पेनाढ्यमदः कलौ।
स्त्रीणां रूपमदश्चैवं केशैरेव भविष्यति।।

२ सर्वेषामेव भूतानां त्रिविधः प्रतिसञ्चरः।।
नैमित्तिकं प्राकृतिकस्तथैवात्यन्तिको लयः।।

**प्रश्नः ८ कस्याप्येकस्योत्तरं सविस्तरं यथाग्रन्थं देयम्।** १०

१ कलिधर्मनिरूपणं क्रियताम्।

२ आध्यात्मिकादित्रिविधतापवर्णनं क्रियताम्।

## संयुक्तान्वितिः (Unit 5)

**प्रश्नः ९ अधोलिखितप्रश्नेभ्यः दशप्रश्नानामेकैकद्विवाक्येन उत्तराणि लिखन्तु।** १०

१ विष्णुपुराणे कत्यंशाः कति च पद्यानि?

२ पृषध्रः शूद्रः कथं जातः?

३ मान्धातृकन्यानां विवाहः केन साकमभवत्?

४ यादवकुमारेभ्यः धनुर्विद्यादायकाचार्याः कत्यासन्?

५ जरासन्धपुत्रस्य नाम किमासीत्?

६ भूर्लोकादि कति लोकाः के च ते?

७ भगवता कयोः वृक्षरूपिणोः उद्धारः कृतः?

८ कृष्णेन कस्य निग्रहः कृतः?

९ गोकुलरक्षार्थं बालकृष्णेन कः धृतः?

१० रामकृष्णौ मथुरामानेतुं कंसेन कः प्रेषितः?

११ श्रीकृष्णः उद्धवाय कुत्र गन्तुं वदति?

१२ देवाङ्गनाः कस्य शापात् दस्युपीडिता अभवन्?

१३ कलौ भगवत्प्राप्तिः कस्मात् भवति?

१४ एककल्पे कति मनवः शासनं कुर्वन्ति?

१५ ब्रह्मणः एकदिनं किं समं भवति?

**************************